**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# स्फोटविमर्शः

**किरणरिजालः**

*अध्यापकः, महेशसंस्कृतगुरुकुलम्*

rijalkiran60@gmail.com

https://orcid.org/0009-0000-2427-7993

https://doi.org/10.3126/srj.v1i2.99124

**लेखसारः**

*संस्कृतव्याकरणशास्त्रं विश्वस्मिन् उपलब्धेषु व्याकरणेषु प्राचीनतमं समृद्धं च वर्तते। पाणिन्यादिभिर्महर्षिभिः संस्कृतव्याकरणस्य समुन्नत्यै महान् आयासो विहितः। संस्कृतव्याकरणं न केवलं शब्दशास्त्रम्, अपि तु दार्शनिकविषयानपि इदं प्रकाशयति। व्याकरणप्रतिपादितेषु विषयेषु स्फोटसिद्धान्तो मुख्यस्थानं धारयति। वैयाकरणैरिदमखिलं जगत् शब्दब्रह्मणो विवर्तभूतं मन्यते, तच्च शब्दब्रह्म 'स्फोट' इति नाम्ना व्यवह्रियते। प्रस्तुतेऽस्मिन् लेखे स्फोटस्य स्वरूपम्, व्युत्पत्तिः, परम्परा, तात्त्विकाधारश्च सम्यग् विवेचिताः सन्ति। अनुसन्धानार्थं सामग्रीसंकलने पुस्तकालयीयविधिः प्राधान्येन अङ्गीकृतः। अध्ययने च मुख्यरूपेण वर्णनात्मको विश्लेषणात्मकश्च विधिरवलम्बितोऽस्ति। यथावश्यकं तुलनात्मकविधिरपि समाश्रितः, येन मीमांसकानां नैयायिकानां वैयाकरणानां च शब्दस्वरूपविषयकानि मतानि परस्परं समीक्षितानि सन्ति। एवञ्च स्फोटायन-पतञ्जलि-भर्तृहरि-कौण्डभट्ट-नागेशभट्टादीनामाचार्याणां स्फोटविषयकमतानि सप्रमाणं विश्लेषितानि। वैयाकरणमते वाक्यस्फोटस्यैव मुख्यत्वमस्ति। वर्णाः पदानि च व्यावहारिकाः कल्पिताश्च सन्ति। वस्तुतस्तु अखण्डं वाक्यमेव नित्यं शब्दतत्त्वं शक्त्याश्रयश्च वर्तत इति निष्कर्षः स्थापितो वर्तते। अस्य लेखस्याध्ययनेन अध्येतारः स्फोटसिद्धान्तस्य दार्शनिकस्वरूपं महत्त्वमावश्यकत्वञ्च सम्यगवगन्तुं शक्नुवन्ति।*

**शब्दकुञ्जी :** ध्वनिः, ध्वनिव्यङ्ग्यत्वम्, वर्णः, वाक्यस्फोटः, स्फोटः, शब्दतत्त्वम्

**विषयपरिचयः**

नैयायिकाः वर्णानामुत्पत्तिं मन्वते, अतः वर्णा अनित्या इति तेषां मतम्, यतः यदुत्पद्यते तस्य विनाशोऽपि ध्रुवं भवति। यद्यपि मीमांसकाः वर्णानां नित्यत्वं स्वीकुर्वन्ति। तेषां मते वर्णानामभिव्यक्तिर्भवति, न तूत्पत्तिः। परन्तु ते वर्णेभ्यः पृथक् स्फोटतत्त्वं नाङ्गीकुर्वन्ति। किन्तु वर्णानां नित्यत्वपक्षेऽपि स्फोटतत्त्वस्य आवश्यकता भवत्येव, यतः येन क्रमेण वर्णा अभिव्यज्यन्ते, तेनैव क्रमेण तेषां स्मरणं भवेदिति न नियमः। अर्थबोधस्य समस्या तदा एव सम्यक् समाधीयते, यदा वयं किञ्चित् नित्यं शब्दतत्त्वमङ्गीकुर्मः। तदेव व्याकरणदर्शने 'स्फोटतत्त्वम्' इति कथ्यते। "स्फुट विकसने" इत्यस्माद्धातोः भावे घञ्-प्रत्यये कृते "स्फोटः" इति शब्दो निष्पद्यते, यस्यार्थः "विकासः" इति भवति। स्फोटशब्दस्य व्युत्पत्तिर्वर्तते "स्फुटत्यर्थोऽस्मादिति स्फोटः, स्फुट्यते इति अर्थोऽपि स्फोटः" इति । अर्थात् यस्मात् अर्थः प्रस्फुटति, तत् शब्दतत्त्वं "स्फोटः" इति कथ्यते। वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः,

पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेति स्फोटोऽष्टविधः। एतेषु स्फोटेषु वाक्यस्फोटातिरिक्तानामवास्तवत्वमेव। वैयाकरणानां सिद्धान्ते वाक्यस्फोटस्यैव मुख्यत्वम्, शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण लोकानां प्रथमतो वाक्ये एव शक्तिग्रहात्, वाक्यादेव वाक्यार्थस्य पूर्णत्वाच्च (मिश्रः, १९८८, पृ. ४७)। स्फोटसिद्धान्तस्य प्रथमः प्रतिपादकः आचार्यः स्फोटायन इति मन्यते । पदमञ्जरीकारो हरदत्तः स्फोटायनशब्दस्य व्युत्पत्तिं दर्शयन् कथयति यत् - "स्फोटोऽयनं पारायणं यस्य सः स्फोटायनः" (हरदत्तः, १९८१, सू. ६/१/१२३)। पाणिनिविरचिते "अवङ् स्फोटायनस्य" (पाणिनिः, २०१८, सू. ६/१/१२३) इति सूत्रे "स्फोटायन" नामकस्याचार्यस्य उल्लेखो दृश्यते। पाणिनीयसूत्रेष्वपि स्फोटो ध्वनितो वर्तते। शब्दशास्त्रे स्फोटसिद्धान्तस्य प्रथमो व्यवस्थितः प्रतिपादकः पतञ्जलिरिति स्वीक्रियते, यतो हि महाभाष्ये बहुत्र स्फोटशब्दस्योल्लेखो दृश्यते। तदनन्तरमाचार्यो भर्तृहरिः दर्शनरूपेण स्फोटवादस्य चर्चां स्वकीयवाक्यपदीये कृतवान्। तत्र स्फोटस्य स्वरूपं ध्वनिव्यङ्ग्यत्वमित्यादिविषयाः प्रतिपादिताः। अनन्तरं तदुत्तरवर्तिभिः नागेशकौण्डभट्टादिभिः भूषणसारमञ्जूषादिग्रन्थेषु  स्फोटसिद्धान्तः सम्यग् प्रतिपादितः। आधुनिकसमयेऽपि बहुभिर्विद्वद्भिः स्फोटविषये अध्ययनं विहितं वर्तते। डा. राममनोहरमिश्रमहोदयेन **भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा** (१९९३) इति विद्यावारिधिशोधप्रबन्धो विरचितः, यत्र स्फोटनिरूपणमित्याख्यप्रकरणे स्फोटविषये नागेशकौण्डभट्टयोः मतानां तुलनात्मकमध्ययनं विहितम्। विनोदकुमारचौधरीनाम्ना विदुषा **स्फोटवाद एक विमर्श** (२०१८) इत्याख्यग्रन्थे वेदान्तसांख्यबौद्धजैनादिविविधदर्शनाभिमतस्य प्रतिपादितस्फोटसम्बद्धविषयस्य चर्चा विहिता। सुवलचन्द्रसाहुनाम्ना विदुषा **इन्टरनेशनल जर्नल अफ अप्लाइड रिसर्च** (वर्ष-२, अङ्क-२, २०१६) इत्याख्यशोधपत्रिकायां **पाणिनीयव्याकरणे स्फोटविमर्शः** (पृ. ७१९-७२१) इति शीर्षकमवलम्ब्य स्फोटस्य परिभाषा, शब्दस्याभिव्यक्तिप्रकिया इत्यादिविषये अध्ययनं कृतम्। नारायणजोशीमहोदयेन **शारदा अनुसन्धान पत्रिका** (वर्ष-१, अङ्क-१, २०२६) इत्याख्यानुसन्धानात्मकपत्रिकायां **संस्कृतव्याकरणे स्फोटविवेकः** (पृ. ५२-६३) इति शीर्षकमवलम्ब्य वर्णपदवाक्यादिस्फोटानां चर्चा विहिता। इत्थं पूर्वचर्चितैरनुसन्धातृभिः स्फोटस्य चर्चापरिचर्चा सम्यग्रूपेण विहिता। तथापि स्फोटस्य स्वरूपम्, भेदाः, विविधदर्शनानां मतानि, वैयाकरणानां सिद्धान्तश्च एकत्र सम्यक् निरूपिताः न दृश्यन्ते। अतः एतत्सर्वं समालोचनात्मकदृष्ट्या विवेचयितुमयं लेखो विरच्यमानो वर्तते। इदमध्ययनं विविधवैयाकरणैः प्रतिपादितस्य स्फोटसिद्धान्तस्य विश्लेषण एव सीमितं वर्तते। तदतिरिक्तसिद्धान्तमनुसन्धानमिदं नैव विषयीकरोति।

## समस्या उद्देश्यञ्च

स्फोटस्वरूपं किम् ? वैयाकरणानां नये स्फोटसिद्धान्तः कथं प्रदर्शितोऽस्ति ? स्फोटं कतिविधम्, कस्य च मुख्यत्वम् ? इत्येतेषां जिज्ञासानां शमनार्थं विहितेऽस्मिन् अनुसन्धाने  एते प्रमुखाः विषयाः समस्यारूपेण  उपस्थिताः सन्ति। एतासां समस्यानां समाधानमेव अस्याध्ययनस्य उद्देश्यं वर्तते।

## अध्ययनविधिः

प्रस्तुतलेखस्य कृते आवश्यकसामग्रीणां सङ्कलनाय पुस्तकालयीयविधिरेव प्राधान्येनाङ्गीकृतो विद्यते। तथा च अस्मिन् लेखे महाभाष्यम्, वाक्यपदीयम्, वैयाकरणभूषणसारः, परमलघुमञ्जूषा, इत्यादयो ग्रन्थाः

प्राथमिकसामग्रीत्वेन गृहीता वर्तन्ते। तत्तद्व्याख्यानग्रन्थाः, अनुसन्धानपराश्च ग्रन्थाश्च द्वितीयकसामग्रीत्वेन गृहीताः सन्ति। एवञ्चाध्ययनसन्दर्भे वर्णनात्मकविधिः,विश्लेषणविधिः, तुलनात्मकविधिश्चाश्रितो वर्तते।

## सैद्धान्तिकपर्याधारः

भगवता पाणिनिना स्फोटशब्दस्य उल्लेखः प्रत्यक्षतया न कृतः। परन्तु "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यादिपाणिनीयसूत्रेषु स्फोटसिद्धान्तं ध्वनितं वर्तते। पाणिनिपूर्ववर्ती आचार्यः स्फोटायनः स्फोटसिद्धान्तस्य प्रथमः प्रतिपादकः इति अनुमीयते , यतोहि तस्य नाम अपि स्फोटसम्बद्धं वर्तते। पदमञ्जरीकारेण हरदत्तेन स्फोटोऽयनं पारायणं यस्य सः इति रीत्या स्फोटायनशब्दस्य व्युत्पत्तिः कृता। महर्षिणा पतञ्जलिना स्फोटशब्दस्योल्लेखः स्वकीयमहाभाष्ये बहुस्थले कृतः। तदनन्तरम् आचार्यो भर्तृहरिः वाक्यपदीयग्रन्थे सिद्धान्तरूपेण स्फोटवादस्य चर्चामकार्षीत्। एवञ्च नागेशकौण्डभट्टादयः स्वस्य स्वस्य ग्रन्थे स्फोटसिद्धान्तस्य चर्चामकार्षुः। अस्मिन् आलेखे पूर्वोक्ताचार्यैः स्फोटविषये स्थापिताः सिद्धान्ताः पर्याधारत्वेन गृहीता वर्तन्ते। एवञ्च वर्णनित्यवादिनां मीमांसकानां वर्णानित्यवादिनां नैयायिकानाञ्च मतान्यपि समाधृतानि।

## स्फोटस्वरूपम्'

स्फोट' इति शब्दः "स्फुट विकसने" इत्यस्माद् धातोः "अकर्त्तरि च कारके संज्ञायाम्" (पाणिनिः, २०१८, सू. ३/३/१९) इति पाणिनीयसूत्रेण करणेऽर्थे घञ्-प्रत्यये कृते निष्पद्यते। करणव्युत्पत्त्यनुसारं "स्फुटति प्रकाशतेऽर्थो येन" स स्फोटः इति फलति, येन अस्य 'अर्थविषयकज्ञानकरणत्वं' इति लक्षणं सिद्धं भवति। किन्तु केवलम् एतावदेव लक्षणं स्वीक्रियते चेत्, चक्षुरादीन्द्रियेषु अतिव्याप्तिदोषः प्रसज्येत, यतो हि चक्षुरादिपि घटाद्यर्थस्य प्रत्यक्षबोधे करणानि भवन्ति, तस्य वारणाय कर्मव्युत्पत्तिरपि आश्रयणीया। तदनुसारं "स्फुट्यते ध्वनिना व्यज्यते इति" अर्थात् यः प्राकृतध्वनिना अभिव्यक्तो भवति स स्फोटः। ततश्च "ध्वनिव्यङ्ग्यत्वे सति अर्थबोधजनकत्वम्" इति लक्षणं समायाति। अस्यायं भावः - यो हि वर्णैः ध्वनिभिर्वा अभिव्यक्तो भूत्वा अर्थप्रतीतिं जनयति, स एव नित्य आन्तरिकः शब्दः 'स्फोटः' इत्युच्यते। अत्र प्राकृतध्वनिः एव स्फोटस्य व्यञ्जको भवति, न तु कालभेदाधायको वैकृतध्वनिः। भगवान् पतञ्जलिः महाभाष्ये शब्दस्य लक्षणं कुर्वन् "येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" (पतञ्जलिः, २०१७, पृ. ४) इति कथनेन स्फोटस्यैव अर्थप्रत्यायकत्वं प्रमाणितवान्, यतो हि क्षणिकाः वर्णाः मिलित्वा अर्थबोधं कारयितुं न शक्नुवन्ति, अपि तु ते बुद्धौ एकम् अखण्डं स्फोटं जाग्रयन्ति। तथैव शब्दकल्पद्रुमे "स्फुट्यते व्यज्यते वर्णैरिति, स्फुटत्यर्थो यस्मादिति वा शब्दव्यापारविशेष" इत्युक्त्वा वर्णैरभिव्यङ्ग्यत्वं तथा अर्थप्रस्फुटनकारित्वं स्वीकृत्य अस्य 'शब्दव्यापारविशेषत्वं' व्याख्यातम्। अमरकोषेऽपि व्यक्तेऽर्थे स्फोटशब्दस्य प्रामाणिकः व्यवहारो दृश्यते। अतः निष्कर्षरूपेण वक्तुं शक्यते यत् उच्चार्यमाणाः वर्णाः तु केवलं माध्यमभूताः सन्ति, वस्तुतः अर्थप्रकाशकस्तु बुद्धौ समभिव्यक्तः अखण्डो नित्यश्च स्फोट एव वर्तते।

## वर्णानां नित्यानित्यत्वे मीमांसकमतम्

मीमांसकाः वर्णान् नित्यान् सर्वगतांश्च मन्वते। तेषां मते जगति वर्णाः सर्वदा विद्यन्ते, केवलं उच्चारणसमये ते अभिव्यक्ताः भवन्ति, अन्यदा च तिरोहिताः भवन्ति। अतः 'अर्कः', 'अश्वः', 'अर्थः' इत्यादिषु भिन्नेषु पदेषु

श्रूयमाणोऽकारो भिन्नो नास्ति, अपि तु एक एव अस्ति। यथा एक एव सूर्यः अनेकदर्पणेषु वा जलाधारेषु पृथक्-पृथक् प्रतीयमानोऽपि वस्तुतः एक एव भवति, तथैव विभिन्नकालेषु विभिन्नस्थानेषु च श्रूयमाणाः सजातीया वर्णा एकत्वाद् अभिन्ना एव। अनेनैव न्यायेन मीमांसका वाक्येषु पदानाम् अपि एकत्वं साधयन्ति, यथा "गामानय", "गां बधान" इति वाक्यद्वये 'गाम्' इति पदं एकम् एव। परन्तु मीमांसकाः वर्णाद् अतिरिक्तं पदस्य, पदाद् अतिरिक्तं च वाक्यस्य किमपि पृथक् अस्तित्वं न स्वीकुर्वन्ति। तेषां दृढं निश्चयो यत् वर्णानां समूह एव पदं भवति, पदानां समूहश्च वाक्यं वर्तते। तेषां मते गौरिति पदे गकार-औकार-विसर्जनीयाः एव शब्दः', अर्थात् वर्णा एव एकमात्रं परमं सत्यम्, तदतिरिक्तं पदं वाक्यं च मिथ्या अस्ति।

### नैयायिकमतम्

मीमांसकैरिव नैयायिकैरपि मन्यते यत् वर्णानां समूह एव अर्थस्य वाचको भवति। यदा वाक्यस्था वर्णाः क्रमशः उच्चार्यन्ते, तदा श्रोता प्रतिवर्णं पृथक् पृथक् शृणोति। ततः स बुद्धौ तान् सर्वान् वर्णान् एकत्र संयोजयति। अस्याः संयोजनप्रक्रियाया अनन्तरमेव 'इदं पदम्' इति निश्चयात्मकं ज्ञानं जायते। न्यायशास्त्रस्य ग्रन्थेषु अपि एतदेव समर्थितमस्ति। न्यायसूत्रभाष्ये उक्तम् - "किं पुनरिदं पदं नाम ? किञ्च वाक्यमिति ? वर्णसमूहः पदम्, पदसमूहो वाक्यम्" (गौतमः, २०१३, सू. ३/२/६२) इति। न्यायलीलावत्याम् अपि स्पष्टं कथितम् -"किं तर्हि प्रातिपदिकम् क्रमवद्वर्णसंहतिरिति ब्रूमः" (आचार्यः, १९९१, पृ. ६७१)। संक्षेपेण वक्तुं शक्यते यत् वर्णसमूहः पदं कथ्यते, पदसमूहश्च वाक्यं भवति। परन्तु मीमांसकानां मते वर्णा नित्याः सन्ति, नैयायिकास्तु तद् विरुद्धं वर्णानाम् अनित्यत्वं स्वीकुर्वन्ति। नैयायिकानां मते वर्णोऽनित्यः, यतः स इन्द्रियजन्यज्ञानस्य विषयो वर्तते। यथा चक्षुरिन्द्रियेण गृह्यमाणं रूपादिकं विनश्वरं भवति, तथैव वर्णा अपि उत्पत्त्यनन्तरं नश्यन्ति। अपि च नैयायिकमते गकारादयो वर्णा नैके सन्ति। यदि वर्ण एक एव अभविष्यत्, तर्हि राम-कृष्ण-श्यामादिभिः भिन्नभिन्नस्थानेषु एकस्मिन्नेव समये युगपत् गकारस्य उच्चारणं श्रवणं च न सम्भविष्यत्। अतः भिन्नस्थानेषु युगपद् उपलभ्यमानत्वात् वर्णा अनित्या बहुसंख्याकाश्च सिद्ध्यन्ति। ननु यदि वर्णाः क्षणिका विनाशिनश्च सन्ति, तर्हि तेषां समुदायः कथं सम्भवति? यदा द्वितीयो वर्ण उत्पद्यते, तदा तु प्रथमो नष्टो भवति, तर्हि समुदायं विना पदज्ञानं कथं स्यात्? अस्य समाधानाय उच्यते नैयायिकैः - क्रमेण उत्पन्ना विनष्टाश्च वर्णा नष्टा अपि बुद्धौ एकं संस्कारं त्यजन्ति। यथा वयं क्रमशः एकैकं ग्रासं खादामः, तदा पूर्वतने ग्रासे जठरं गतेऽपि अन्ते सर्वेषां ग्रासानां सम्मिलेनेन तृप्तिर्जायते, तथैव प्रत्येकं वर्णस्य अनुभवेन जनितास्संस्कारा अन्तिमवर्णस्य श्रवणकाले जाग्रता भवन्तः एकस्मृतिं जनयन्ति। सा एकस्मृत्यारूढा वर्णमाला एव अर्थस्य बोधं कारयति, अतः कोऽपि दोषो नास्ति।

### वैयाकरणमतम्

वैयाकरणा वर्णातिरिक्तं स्फोटनामकं नित्यं तत्त्वं स्वीकुर्वन्ति। अयमेव स्फोटः शक्त्याश्रयोऽर्थबोधजनकश्च भवति। वर्णेषु साक्षात् वाचकत्वं न भवति इति वैयाकरणानां मतम्। वर्णवाचकत्वखण्डनावसरे आचार्यनागेशभट्टेन मञ्जूषायाम् द्वौ विकल्पौ उपस्थापितौ —

१) किं प्रत्येकं वर्णः अर्थस्य वाचकः?

२) आहोस्वित् वर्णानां समुदायः अर्थस्य वाचकः?

**प्रथमपक्षस्य खण्डनम्**

यदि प्रथमः पक्षः स्वीक्रियते चेत्तदा 'धन' इति शब्दस्योच्चारणकाले प्रथमेन धवर्णेनैव धनरूपस्यार्थस्य बोधो भविष्यति। ततश्च तदुत्तरवर्तिनां 'न' इत्यादीनां वर्णानाम् उच्चारणं व्यर्थं स्यात्। किं च प्रत्येकं वर्णस्य अर्थवत्त्वात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पाणिनिः, २०१८, सू. १/२/४५) इति सूत्रेण प्रातिपदिकसंज्ञा स्यात्, तथा च प्रातिपदिकत्वात् सुबुत्पत्तौ "नलोपः प्रातिपदिकान्तस्य" इत्यादिसूत्रेण नलोपादिसम्भवेन अनिष्टरूपापत्तिः स्यात्। अतः प्रत्येकं वर्णः वाचकः भवितुं नार्हति।

**द्वितीयपक्षस्य खण्डनम्**

यदि च वर्णानां समूहो वाचक इति द्वितीयः पक्षः स्वीक्रियते , तर्हि तदपि न सम्भवति। यतो हि वर्णाः क्रमिकाः क्षणिकाश्च भवन्ति। एकस्य वर्णस्य उच्चारणानन्तरं द्वितीयक्षणे स नश्यति, ततः अन्यस्य वर्णस्य उच्चारणं भवति। एवं स्थिते समेषां वर्णानां समकालस्थितिर्न सम्भवति। येषां वर्णानां यौगपद्यं नास्ति, तेषां समूहः कथं भवितुमर्हति? अतः वर्णानां समुदायोऽपि अर्थवाचको भवितुं न शक्नोति।

इत्थं यदा वर्णेषु प्रत्येकशः समूहरूपेण वा अर्थबोधकता न सिद्धा, तदा विवक्षितार्थस्य प्रकाशनाय, शब्दशक्तेराश्रयतया च पद-वाक्यरूपेण भासमानः कश्चन शाश्वतः शब्दः अवश्यमेव मन्तव्यः, यो हि वर्ण-पद-वाक्यातिरिक्तो वर्ततन्ते। स एव नित्यशब्दः 'स्फोट' इत्युच्यते। 'स्फुटत्यनुभवपथमारोहति अर्थो यस्माद्' अर्थात्, यस्मात् तत्त्वात् अर्थः स्फुटति, यश्च अर्थः बुद्धिगतो भूत्वा अनुभवविषयो भवति, सः एव 'स्फोटः' इति कथ्यते। वर्णाः केवलं स्फोटस्य अभिव्यञ्जकाः सन्ति। उच्चारिताः वर्णाः बुद्धौ विद्यमानं नित्यं स्फोटं जाग्रयन्ति, तस्मात् स्फोटादेव च अर्थज्ञानं जायते।

वस्तुतस्तु वर्णाः सत्या न सन्ति, न च पदानि। यथा 'ऐ' 'औ' इति वर्णयोः श्रूयमाणाः अवयवाः आ-इ, आ-उ इत्यादयः वास्त्विकाः न सन्ति, तथैव पदेषु वर्णानां सत्ता, वाक्येषु च पदानां पृथक् सत्ता अपि काल्पनिकी अस्ति। वस्तुतः 'अखण्डः वाक्यस्फोटः' एव मुख्यः शब्दः अस्ति, यस्मात् अर्थबोधो भवति। यद्यपि वाक्यम् एकम् अखण्डं च अस्ति, तथापि ध्वनेरुपाधिवशात् तत्र वर्ण-पदादीनां काल्पनिक भेदः प्रतिभासते। यथा शुद्धः स्फटिकमणिः जपाकुसुमस्य सान्निध्यात् रक्तः पीतो वा प्रतीयते, अथवा दर्पणस्य भेदात् मुखं दीर्घं वृत्तं वा दृश्यते, तथैव मूलतः एकम् अखण्डं वाक्यमपि उपाधिवशात् भिन्न-भिन्नवर्णपदरूपेण अवभासते। यदि वर्णाः पदानि च असत्यानि सन्ति, तर्हि व्याकरणशास्त्रे तेषां विभाजनं किमर्थं कृतम्? अस्योत्तररूपेण वैयाकरणाः कथयन्ति यत् केवलं मन्दबुद्धीनां शिष्याणां सुखबोधाय शास्त्रकारैः अखण्डे वाक्ये वर्णाः कल्पिताः पदानि च परिकल्पितानि। अतः वाक्यपदीये आचार्यभर्तृहरिणा स्पष्टं प्रोक्तं यत्-

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥** (भर्तृहरिः, १९७७, श्लो. १/७४)

अर्थात् वस्तुतः वाक्यमेव परमं सत्यम्, अन्यत् सर्वं व्यावहारिकं काल्पनिकं च अस्ति।

## स्फोटसिद्धान्तस्य परम्परा

स्फोटसिद्धान्तः कश्चन आधुनिकः कपोलकल्पितः सिद्धान्तो नास्ति। अस्य बीजं अस्माकं प्राचीनेषु वेदेषु, उपनिषत्सु, ब्राह्मणग्रन्थेषु पुराणेषु च उपलभ्यते। तत्र वाचः महती महिमा वर्णिता अस्ति, या वस्तुतः स्फोटतत्त्वस्यैव पूर्वपीठिका अस्ति। परन्तु तस्मिन् प्राचीनकाले अयं सिद्धान्तः पृथक् दर्शनरूपेण व्यवस्थितरूपेण वा न प्रतिपादितः, अपि तु आध्यात्मिकरूपेण तत्र तत्र प्रसङ्गतः एव विचारित आसीत्। श्रीमद्भागवतमहापुराणेऽपि अस्य वर्णनं प्राप्यते। उक्तञ्च तत्र-

**दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः।**

**नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतिः ।।** (व्यासः, वि.सं. २०७५, श्लो. १०/८५/९)

हरिवंशपुराणेऽप्युक्तम्-

अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः। (व्यासः, २०१८, श्लो. ३/८८/५५)

इत्थं वैयाकरणैरङ्गकृतः स्फोटः पुराणेष्वपि वर्णितो लभ्यते। पुराणानामनन्तरं परवर्तिकालस्य आचार्याणां प्रयत्नेन स्फोटतत्त्वस्य दार्शनिको विकाशः सञ्जातः। अयं स्फोटसिद्धान्तः कदा, केन च आचार्येण प्रथमतया वादरूपेण संस्थापितः, अस्य निश्चितः समय इतिहासश्च स्पष्टो नास्ति। तथापि स्फोटायननामक ऋषिरस्य आदिप्रवर्तको मन्यते, यस्य नामोल्लेखः पाणिना अपि "अवङ् स्फोटायनस्य" (पाणिनिः, २०१८, सू. ६/१/१२३) इति सूत्रे कृतः। स्फोटविषये वैयाकरणैः प्रतिपादितस्य सिद्धान्तस्य इदानीं चर्चा क्रियते।

## महर्षिस्फोटायनमतम्

व्याकरणशास्त्रे महर्षिस्फोटायन एव स्फोटतत्त्वस्य प्रथमः प्रतिपादक इति अनुमीयते। यद्यपि सम्प्रति तस्य कश्चन स्फोटविषयकः मौलिकग्रन्थः न प्राप्यते। महर्षिपाणिनिना स्वकीये अष्टाध्यायीग्रन्थे "अवङ् स्फोटायनस्य" (पाणिनिः, २०१८, सू. ६/१/१२३) इति सूत्रे स्फोटायनमहर्षेः नाम आदरपूर्वकं स्मृतम्। पदमञ्जरीकारो हरदत्तः स्फोटायनशब्दस्य व्युत्पत्तिं दर्शयन् कथयति यत् स्फोटोऽयनं पारायणं यस्य सः स्फोटायनः (हरदत्तः, १९८१, सू. ६/१/१२३)। अर्थात् स्फोटसिद्धान्तस्य निरूपणे तत्परः वैयाकरणाचार्यः एव स्फोटायनः। अर्वाचीनः प्रसिद्धवैयाकरणः नागेशभट्टः स्फोटस्य स्फोटायनऋषिसम्मतत्वं प्रतिपादयति। उक्तञ्च-

**वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।**

**परिष्कृत्योक्तवांस्तेन, प्रीयतां परमेश्वरः ।।** (मिश्रः, १९८३, पृ. २१५)

एवं स्फोटायनेन स्फोटसिद्धान्तस्य मूलाधारः प्रतिष्ठापित इति ज्ञायते।

## पाणिनिमतम्

महर्षिपाणिनिना अष्टाध्याय्यां स्फोटशब्दस्य साक्षादुल्लेखो न कृतः, तथापि सः स्फोटवादं पूर्णतः स्वीकरोतीति तस्य सूत्राद् ज्ञायते। पाणिनिप्रणीतम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पाणिनिः, २०१८, सू. १/२/४५)इति सूत्रमत्र प्रमाणम्। अनेन सूत्रेण अर्थबोधकस्य शब्दस्य प्रातिपदिकसंज्ञा विधीयते। वैयाकरणानां मतमस्ति यत् उच्चार्यमाणा वर्णास्तु क्षणिका नाशवन्तश्च भवन्ति। यदि अखण्डो नित्यश्च स्फोटात्मकशब्दो न स्वीक्रियते, तर्हि वर्णानां क्षणिकत्वात्

अर्थबोधकत्वरूपा शक्तिरेव न सम्भवेत्। शक्त्यभावे च पाणिनिसूत्रं व्यर्थं स्यात्। अतः सूत्रारम्भसामर्थ्याद् ज्ञायते यत् पाणिनिना स्फोटवादः समर्थित इति। इत्थं पाणिनिसूत्रेषु स्फोटसिद्धान्तस्य बीजरूपेण प्रतिपादनं दृश्यते।

**वार्तिककारमतम्**

पाणिनीयसूत्राणां पूरकत्वेन वार्त्तिकानि रचयता महर्षिकात्यायनेनापि स्फोटात्मकशब्दः स्वीकृतः। कात्यायनेन सिद्धे शब्दार्थसम्बन्धे इति स्वकीयप्रथमे वार्त्तिके शब्दशब्देन स्फोटात्मकः शब्द एव गृहीतः। लोके यो ध्वनिः श्रूयते, स तु अनित्योऽस्ति। यदि शब्दस्य अर्थस्य च सम्बन्धो नित्यः सिद्धः अस्ति, तर्हि सः शब्दः केवलं ध्वनिः भवितुं नार्हति। स तु बुद्धौ स्थितो नित्यः स्फोट एव भवितुं शक्नोति। अतः शब्दस्य नित्यत्वसिद्धये कात्यायनः स्फोटं स्वीकरोति। एवं कात्यायनेन शब्दस्य नित्यत्वं स्वीकृत्य स्फोटसिद्धान्तः समर्थितः।

**महाभाष्यकारमतम्**

महाभाष्यकारेण पतञ्जलिना स्फोटः प्रतिपादितवान्। एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम्, भेर्याघातवत्। तद्यथा भेर्याघातो भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति। कश्चिद् त्रिंशत्। कश्चिच्चत्वारिंशत्, स्फोटश्च तावानेव भवति। ध्वनिकृता वृद्धिः,

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥** (पतञ्जलिः, २०१७, पृ. ७०८)

एवञ्च महाभाष्ये बहुत्र स्फोटशब्दस्य उल्लेखो लभ्यते। तद्यथा अथवा उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवति इति (पतञ्जलिः, २०१७, पृ. ९०)। तथैव पस्पशाह्निके महाभाष्ये अथ गौरित्यत्र कः शब्द इत्याशंक्य समाहितम् येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः (पतञ्जलिः, २०१७, पृ. ४)। अत्र पतञ्जलिः स्फोटाभिप्रायेण एकवचनं प्रयुक्तवान्। एवं पतञ्जलिना स्फोटस्य अर्थप्रत्यायकत्वं सप्रमाणं प्रतिपादितम्।

**आचार्यभर्तृहरेर्मतम्**

व्याकरणदर्शने वाक्यपदीयग्रन्थस्य रचयिता आचार्यभर्तृहरिः स्फोटसिद्धान्तं दर्शनरूपेण संस्थापितवान् । तेन स्फोटस्य लक्षणं, भेदाः, अभिव्यक्तिप्रक्रिया, ध्वनिस्फोटयोः भेदश्च सूक्ष्मतया विचारिताः। भर्तृहरिमते स्फोटात्मकः शब्दो नित्यो वर्तते। अतः स कालिकभेदाद् रहितो भवति। शीघ्रमन्देत्याद्युच्चारणक्रियया स्फोटस्य स्वरूपे कोऽपि भेदो न जायते। यद्यपि स्फोटः कालभेदरहितोऽस्ति, तथापि सः स्वस्य अभिव्यञ्जकस्य ध्वनेः कालम् अनुसरति। ध्वनिना सह सम्बद्ध एव स्फोट उपलभ्यते, अतः यो ध्वनेः उपलब्धिकालः स एव स्फोटस्य उपलब्धिकाल इति प्रतीयते। ध्वनिः द्विविधः स्वीकृतः प्राकृतध्वनिः, वैकृतध्वनिः च। येन ध्वनिना सर्वप्रथमं स्फोटस्य ज्ञानं भवति, सः प्राकृतध्वनिः। अयं स्फोटस्वरूपस्य अभिव्यक्तौ मुख्यहेतुरस्ति। वैकृतध्वनिः स्फोटाभिव्यक्तेरनन्तरं यो ध्वनिः तं स्फोटं किञ्चित्कालं यावत् बुद्धौ स्थापयति, स वैकृतध्वनिः। अयं ध्वनिः केवलं द्रुत-विलम्बित-आदि वृत्तिभेदं जनयति, स्फोटभेदं न जनयति। प्राकृतध्वनिः स्फोटस्य अभिव्यक्तेः कारणं भवति। अर्थात् प्रथमं यो ध्वनिरुत्पद्यते, स एव स्फोटं प्रकाशयति। तदनन्तरं

जायमानो वैकृतध्वनिः शब्दस्य दीर्घता, मन्दता, द्रुतता, विलम्बितता इत्यादीन् भेदान् जनयति। किन्तु एतेषां ध्वनिभेदानां प्रभावः केवलं श्रवणानुभवे भवति, स्फोटस्य स्वरूपे तु कश्चिदपि भेदो न जायते।

एतदेव भर्तृहरि अपि उक्तवान्—

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**

**वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥**

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।**

**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्नभिद्यते॥** (भर्तृहरिः, १९७७, श्लो. १/७७)

इत्थं स्फोटस्य ज्ञानाय प्राकृतध्वनिः कारणं भवति, किन्तु उच्चारणभेदः, दीर्घता, द्रुतता, मन्दता इत्यादीनां कारणं वैकृतध्वनिः भवति। एवं भर्तृहरिणा स्फोटसिद्धान्तः दार्शनिकदृष्ट्या सम्यक् विकसितः प्रतिष्ठापितश्च।

कौण्डभट्टमतम्

आचार्यकौण्डभट्टेन वैयाकरणभूषणसारे स्फोटवादस्य महती समीक्षा कृता। तेन वर्णानां वाचकत्वं खण्डयितुं स्फोटस्य स्थापना कृता। वर्णव्यतिरिक्तं स्फोटनामकं तत्त्वमेव शक्तेराश्रयोऽस्ति, तदेव अर्थबोधं जनयति। वर्णास्तु उत्पद्य ध्वंसन्ते, अतस्ते अर्थबोधका भवितुं नार्हन्ति। तेन सप्रमाणं स्फोटस्य अष्टौ भेदाः प्रदर्शिताः, यत्र 'वाक्यस्फोटः' एव मुख्यः सिद्धान्तीकृतः। उक्तञ्च -

**वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतिस्थितिः।**

**साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः॥** (भट्टः, २००१, का. ६१)

कौण्डभट्टेन 'जातिस्फोटः' सम्यक्तया विचारितः। अनन्तानां वर्णानां, पदानां, वाक्यानां च वाचकत्वकल्पनायां गौरवदोषो भवति। अतः लाघवाद् तन्निष्ठायाः जातेरेव वाचकत्वं कल्पनीयम्। यथा भूषणसारे उक्तम्-

**शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।**

**औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्॥** (भट्टः, २००१, का. ७१)

अर्थात् जातिरूपविशिष्टः स्फोट एव वाचको भवति। यद्यपि घटिपटादिपदभेदेन जातिभेदः प्रतिभाति, तथापि व्यक्तिशः भेदः नास्ति। अनेकाभिर्व्यक्तिभिरभिव्यक्ता जातिरेव स्फोटः। इयं जातिरपि अविद्याधर्मविशेषरूपा अस्ति, अतः अस्याः सत्यांशरूपः 'शुद्धस्फोटः' एव वास्तविकं शब्दतत्त्वम् अस्ति। इत्थं कौण्डभट्टेन स्फोटस्य स्वरूपं भेदाश्च युक्तिपूर्वकं निरूपिताः।

## नागेशभट्टमतम्

व्याकरणदर्शनपरम्परायां नागेशभट्टः 'स्फोटतत्त्वप्रकाशकः' इति नाम्ना सुप्रसिद्धः। तेन स्वप्रणीतेषु मञ्जूषाग्रन्थेषु स्फोटवादस्य सक्यग् चर्चा विहिता। शाब्दबोधे अर्थोपस्थितये शक्तिविशिष्टपदस्य आवश्यकता भवति। सा वृत्तिः स्फोटात्मकशब्दे एव वर्तते, न तु ध्वनौ। ध्वनयः अनित्या भवन्ति। उच्चारणाद् अनन्तरं ते नश्यन्ति। नष्टाः ध्वनयः तज्जनिताः संस्काराः वा अर्थबोधे हेतवः भवितुं न शक्नुवन्ति। यथा वेदान्तदर्शने नश्वराणां देहेन्द्रियादीनां ज्ञानाश्रयत्वं नाङ्गीकृत्य नित्यस्य 'आत्मनः' एव ज्ञानाश्रयत्वं स्वीक्रियते, तथैव व्याकरणशास्त्रे नश्वराणां ध्वनीनां वाचकत्वं निरस्य नित्यस्य स्फोटस्यैव वाचकत्वम् अङ्गीक्रियते। परमलघुमञ्जूषायां नागेशेन स्फोटनिरूपणप्रसङ्गे

वाचश्चातुर्विध्यमुक्तम्। तस्यानुसारेण वाक् चतुर्विधा भवति — परा, पश्यन्ती, मध्यमा, वैखरी च। यद्यपि वस्तुतः वाक् एकैव अस्ति, तथापि आश्रयभेदात् तस्याश्चतुर्विधत्वं तन्त्रागमशास्त्रयोः निरूपितम्। नागेशः तन्त्रवासनामेव अनुसृत्य वाचश्चतुर्विधत्वं स्वग्रन्थे स्वीकरोति। भर्तृहरेः वाक्यपदीये तु साक्षात् त्रिविधा एव वाक् निरूपिता — पश्यन्ती, मध्यमा, वैखरी च। परावाक् इत्यस्य तत्र प्रत्यक्षोल्लेखो नास्ति।

एतेषु परा नाम प्रथमा वाक् शब्दब्रह्मस्वरूपा, निर्विकल्पकज्ञानस्य कारणभूता, मूलाधारचक्रे स्थिता च भवति। पश्यन्ती नाम द्वितीया वाग्ब्रह्मस्वरूपा, सविकल्पकज्ञानस्य हेतुः, योगिभिः समाधिदशायामेव लभ्यते। मध्यमा नाम तृतीया नाभिप्रदेशस्था, केवलं मनसः विषयीभूता, स्फोटात्मिका, स्फोटस्य अभिव्यञ्जिका, हृदयप्रदेशस्थितबुद्ध्या ग्राह्या च वर्तते। वैखरी नाम चतुर्थी परश्रोत्रग्राह्या, नादस्वरूपा, कण्ठप्रदेशसम्बद्धा च भवति। मध्यमावैखरीभ्याम् उभाभ्यामेव नादस्य उत्पत्तिः भवति, परन्तु तयोः स्वरूपभेदः वर्तते। वैखरीतः उत्पन्नः नादः स्थूलः, परश्रवणगोचरः, सर्वजनश्रोत्रग्राह्यः, भेर्यादिनादवत् स्वयमर्थहीनश्च भवति। मध्यमातः उत्पन्नः नादः तु अतिसूक्ष्मः, कर्णपिधाने जपादिकाले अनुभूयमानः, परश्रोत्रेण अग्राह्यः, अन्तःस्थवायुना एव व्यङ्ग्यः। एषः सूक्ष्मनादः शब्दब्रह्मस्वरूपस्य स्फोटस्य प्रकाशको भवति। एवम्भूतो वाचकत्वधर्मविशिष्टः, नित्यः, ब्रह्मस्वरूपश्च स्फोटः मध्यमानादेन एव व्यङ्ग्य इति नागेशेन सुस्थिरीकृतम्। अनेन प्रकारेण स्फोटस्य अभिव्यङ्ग्यत्वं सिद्धं भवति। उक्तञ्च -

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।**
**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥** (भट्टः, २०१७, पृ. ७२)

नागेशमते स्फोटः प्रथमतः त्रिधा भवति— वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः च। एते त्रयः भेदाः पुनः जाति-व्यक्तिभेदेन षोढा भवन्ति। अन्ते अखण्डपदस्फोटः तथा अखण्डवाक्यस्फोटः इति द्वौ भेदौ योजयित्वा नागेशभट्टेन अष्टौ स्फोटाः सिद्धान्तिताः। एवम्प्रकारेण नागेशभट्टेन वाक्यस्फोटस्य मुख्यत्वं सुदृढतया समर्थितम्।

**स्फोटस्य भेदाः**

वस्तुतः स्फोटो नित्यः, अवयवरहितत्वात् निरंशः, खण्डरहितत्वात् अविभाज्यश्च एक एव शब्दब्रह्मात्मको वर्तते। तथापि शास्त्राध्येतॄणां सुखबोधाय, शब्दानां वाचकत्वशक्तिनिरूपणाय च वैयाकरणैर्व्यावहारिकदृष्ट्या अस्य स्फोटस्य अनेके काल्पनिका विभागाः कृताः सन्ति। तत्र मुख्यतया व्यक्तिपक्षं जातिपक्षं च आश्रित्य सप्रमाणम् अष्टौ स्फोटाः सिद्धान्तिताः सन्ति। व्यक्तिपक्षे पञ्च भेदाः स्वीक्रियन्ते, यत्र सखण्डदृष्ट्या वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः इति त्रयः, तथा च औपाधिकभेदं निराकृत्य अखण्डदृष्ट्या अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः इति द्वौ मिलित्वा पञ्च व्यक्तिस्फोटाः भवन्ति। अपरस्मिन् जातिपक्षे तु व्यक्तिं नश्वरं मत्वा तद्गतां नित्यजातिमेव वाचकं मन्यमानाराचार्या वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः इति त्रीन् स्फोटान् अङ्गीकुर्वन्ति। इत्थं पञ्च व्यक्तिस्फोटाः त्रयश्च जातिस्फोटा मिलित्वा अष्टौ स्फोटाः सम्पद्यन्ते। यद्यपि एतेषु अष्टसु स्फोटेषु 'अखण्डवाक्यस्फोटः' एव मुख्य इति

वैयाकरणानां राद्धान्तः। यतोहि लोके वाक्यमेव अर्थबोधकत्वेन सत्यं वर्तते, तथापि अन्ये सप्तभेदास्तं मुख्यं परमसिद्धान्तं प्राप्तुं केवलं व्यावहारिकसोपानभूता उपाया एव सन्ति। उक्तञ्च -

**उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः।** (भट्टः, २००१, का. ६९)

इत्थं स्फोटो नित्यः, निरंशः, एकः, अखण्डः, सर्वथा ब्रह्मणा सह अभिन्नश्च अस्ति; तथापि व्यावहारिकदशायां जिज्ञासूनां बोधसौकर्याय वैयाकरणैर्वाचकतादृष्ट्या अस्य अष्टौ काल्पनिकाः पक्षाः सप्रमाणं साधिताः सन्ति, येषु पञ्च व्यक्तिस्फोटाः त्रयश्च जातिस्फोटाः परिगणिताः।

तत्र व्यक्तिस्फोटप्रसङ्गे वर्णस्फोटस्य साधकयुक्तिरियं वर्तते यत्—लोके 'ऋषभः', 'वृषभः', 'वृषः' इति त्रयाणामपि शब्दानां समानार्थे प्रयोगः दृश्यते। अत्र यदि कश्चित् एकमेव आनुपूर्वीविशेषं शक्यतावच्छेदकं मन्येत, तर्हि वर्णव्यत्यासादिना तस्यानुपूर्वेः भङ्गत्वं स्यात्। तस्मात् कस्मात् शब्दात् कस्य अर्थस्य स्मरणं भवेदिति विनिगमनाविरहो जायते। अतः एतादृशस्थले सर्वेषामेव वर्णानां वाचकत्वं स्वीकृत्य वर्णस्फोटः साध्यते। व्याकरणशास्त्रे प्रक्रियासारल्यार्थं ऋषयो वर्णस्तरे विश्लेषणं कृतवन्तः। यथा — "घटं नय, पटं नय" इति वाक्ये कर्मकारकस्य बोधनार्थं घट + अम्, पट + अम् इति विभागः क्रियते। अत्र घट इति प्रकृतिः, अम् इति प्रत्ययः — उभावपि बुद्ध्या कल्पितौ स्तः, न तु स्वतन्त्रतया उच्चार्यमाणौ। एतेन वर्णस्वरूपस्य ज्ञानं कारकभेदस्य च ज्ञानमिति द्विविधं ज्ञानं जायते। परन्तु स्थान्यादेशयोः वाचकवाच्ययोश्च मध्ये संबन्धनिर्णये जटिलता उद्भवति। अतः वर्णस्फोटेन पूर्णः अर्थबोधो न सिद्ध्यति इति मत्वा विद्वांसः अन्ते वाक्यस्यैव प्राधान्यं स्वीकृतवन्तः।

तथैव, 'रामं', 'रामेण', 'रामाय' इत्यादिषु परिनिष्ठितेषु पदेषु कः अंशः प्रकृत्यात्मकः कश्च अंशः प्रत्ययात्मकः इति पृथक्त्वेन निर्धारणे विनिगमनाविरहसाम्यात् प्रकृति-प्रत्ययविभागं परित्यज्य समग्रं पदमेव विशिष्टार्थे वाचकं मन्यते, येन 'पदस्फोटः' सिध्यति। पदमेव स्फोटः इति अस्य सिद्धान्तस्य मूलभावः। वर्णस्फोटवादिनां मते पूर्ववर्णानां संस्कारेण अन्तिमवर्णे अर्थबोधः भवति, किन्तु यदि वर्णे वाचकत्वमेव नास्ति तर्हि संस्काराधारेण अर्थबोधः कथं सम्भवेत् इति प्रश्नः उद्भवति। "रामोऽस्ति" इति उदाहरणे रामकर्तृकसत्ता इति ज्ञानं भवति, परन्तु राम् इत्युच्चार्य पश्चात् ओ इत्युच्चारणे व्यवधानकारणात् अर्थबोधः दुष्करः भवति। अतः वर्णक्रमस्य आनुपूर्वी एव शक्त्यवच्छेदकत्वेन स्वीकार्या। "घटेन" इति पदे घट + एन वा घटे + न इति उभयप्रकारेण विभागः सम्भवति, एतस्मिन् सन्देहे प्रकृतिप्रत्यययोः स्पष्टविभागः असम्भवः। महाभाष्येऽपि "सर्वे सर्वपदादेशाः" इति उक्त्या तथा "बहुवचनस्य वस्नसौ" (पाणिनिः, २०१८, सू. ८।१।२१) इति सूत्रानुसारं च सुबन्तपदस्य सम्पूर्णस्य स्थाने सङ्घातरूपेण आदेशः विधीयते, तत्र अन्तर्गतविभागः न सम्भवति। सखण्डाखण्डभेदेन पदस्फोटो द्विविधः। तत्र सुबन्ततिङन्तरूपो देवदत्तः पचतीत्यादिरूपः सखण्डपदस्फोटः। अखण्डस्फोटस्तु सर्वैः पदस्थितवर्णैः व्यज्यते। यथा घटः इत्यत्र घकारादिध्वनिचतुष्टयाभिव्यक्तो घटस्फोटः। यौगिकं योगरूढञ्च पदं सखण्डपदस्फोटत्वेन रूढिपदं मणिनूपुरादि, वः, नः इत्यादि च अखण्डपदस्फोटत्वेनाभिमतम्।

सर्वप्रथमं व्यवहारे वाक्ये एव शक्तिग्रहात् वाक्यमेव वाक्यार्थस्य वाचक इति वाक्यस्फोटपक्षः। 'हरेऽव', 'विष्णोऽव' इत्यादिषु उदाहरणेषु सन्धिकार्येण पदविभागः अस्पष्टो भवति, तथापि श्रोतुरर्थबोधः सम्यक् जायते। यदि पदज्ञानं विना अपि अर्थबोधः सम्भवति, तर्हि बोधस्य कारणं पदं नास्ति, किन्तु तेषां पदानां समुदायरूपं वाक्यमेव।

अतः वाचकत्वशक्तिः तादृशसमुदायात्मके वाक्ये एव वर्तते, न तु पृथक्पृथक् पदेषु। एतेन वाक्यस्फोटः सिद्ध्यति। उक्तञ्च वैयाकरणभूषणसारे -

**हरेवेऽत्यादि दृष्ट्वा हि वाक्यस्फोटं विनिश्चिनु।** (भट्टः, २००१, का. ६६)

'हरेऽव', 'विष्णोऽव' इत्यादिषु उदाहरणेषु 'एङः पदान्तादति" (पाणिनिः, २०१८, सू. ६।१।१०९) इति पाणिनिसूत्रेण एकादेशे जाते पदयोः सीमा अस्पष्टा भवति । 'हरे' इत्येकं पदम् 'व' इत्यपरम् अथवा 'हरे' इत्येकं 'अव' इत्यपरं वेति विनिगमकाभावात् पदविभागः सुस्पष्टं न ज्ञायते। तथापि अत्र अर्थबोधानुपपत्तिः नास्ति, यतः सुबन्ततिङन्तपदसमुदायरूपे वाक्ये बोधजनकतारूपशक्तिज्ञानं विद्यते, तस्माच्च अर्थबोधः सम्यक् जायते। "वाक्यार्थज्ञाने वाक्यघटकीभूतयावत्पदार्थज्ञानस्य कारणत्वात् यया युक्त्या पदस्फोटः साध्यते तयैव युक्त्या वाक्यस्फोटोऽपि सिद्ध्यति" (मिश्रः, १९८८, पृ. ५०)। यथा घटादिप्रतिपादकेषु सुबन्तपदेषु घटादिनिरूपिता बोधजनकशक्तिः कल्प्यते, तद्वत् 'घटोऽस्ति' इत्यादिवाक्येष्वपि वाक्यार्थनिरूपिता बोधजनकशक्तिरभ्युपगन्तव्या।

वाक्यस्फोटश्च द्विविधः - सखण्डवाक्यस्फोटः अखण्डवाक्यस्फोटश्च। तत्र अखण्डवाक्यस्फोटः पदातिरिक्ताखण्डव्यङ्ग्यः। अस्मिन् पक्षे आकाङ्क्षा-योग्यता-आसत्तीनां कारणत्वं नाङ्गीक्रियते, अतः महत् लाघवं सिद्ध्यति। 'विष्णोऽव' इत्यादिस्थलेषु शब्दानुशासनमाश्रित्य पूर्वरूपे जाते पदविभागः अगत्या स्वीकरणीयः, एवं प्रक्रियाभेदवशात् स एव अखण्डवाक्यस्फोटः सखण्डवाक्यस्फोट इत्युच्यते (मिश्रः, १९८८, पृ. ५०)। इत्थञ्च वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्च सिद्ध्यति।

अनन्तानां वर्णानां, पदानां, वाक्यानां वा वाचकत्वकल्पनापेक्षया तेषु सर्वेषु विद्यमानायाः जातेरेव वाचकत्वकल्पने लाघवं भवति, अतः जातेरेव वाचकत्वं कल्पनीयमिति जातिस्फोटपक्षः। यथा घटादिशब्दानामर्थे लाघवात् घटत्वजातिरेव वाच्या । तथैव घटशब्दस्य उच्चारणानि अनन्तानि सन्ति, तेषु च भेदोऽपि दृश्यते अतः व्यभिचारोऽस्ति, एवं शब्दे विद्यमाना जातिरेव वाचिका कल्पनीया।

उक्तञ्च-

**शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।**
**औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्॥** (भट्टः, २००१, का. ७१)

अर्थात् जातिरूपेण रूषितः स्फोटः एव वाचको न तु जात्याश्रयरूपेण रूषितः। यदि अनन्तस्फोटानां वाचकत्वं कल्प्येत तर्हि गौरवमापद्येत। जातिस्फोटस्य वाचकत्वे तु जातेरैक्यात् तत्तादात्म्यापन्नस्य स्फोटस्यापि ऐक्यं सिद्ध्यति। यद्यपि घटत्वपटत्वादिजातिभेदेन स्फोटस्यापि भेदो वर्तते, तथापि व्यक्तिकृतभेदो नास्ति इति बोद्धव्यम्।

ननु जातिस्फोटपक्षे जातिः प्रत्येकवर्णे विद्यते, अतः प्रत्येकवर्णादर्थबोधः स्यादित्याशङ्कायामुच्यते - अनेकव्यक्तिभिः अभिव्यङ्ग्यायाः जातेरेव वाचकत्वं स्वीकृतम्। प्रत्येकवर्णे जातिः विद्यमानाऽपि तस्मात् अर्थप्रतीतिर्न जायते, यतः प्रत्येकवर्णनिष्ठा जातिः अनेकवर्णाभिव्यङ्ग्या न भवति। अत एव कौण्डभट्टेन उक्तम् —

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटः इति स्मृता। (भट्टः, २००१, का. ७२)

एते सर्वे भेदाः जिज्ञासूनां बोधसौकर्यार्थं कल्पिताः; परमार्थतः स्फोटः एक एव अखण्डो नित्यश्चेति वैयाकरणानां सिद्धान्तः।

### वर्णस्फोटे प्रमाणम्

व्याकरणशास्त्रे पदसंस्काराय साधनभूता ये प्रकृतिप्रत्ययादयः कल्पिताः सन्ति, ते सर्वे वर्णस्फोटस्यैव अन्तर्गता भवन्ति। यद्यपि स्फोटस्वरूपमखण्डमेव, तथापि शास्त्रप्रक्रियाया निर्वाहार्थं कल्पितेषु प्रकृतिप्रत्ययेषु अर्था अपि कल्पिता वर्तन्ते, एतादृशाः कल्पिततत्तत्पदार्थवाचकाः प्रकृतयः प्रत्ययाश्च वर्णस्फोटपदेन व्यवह्रियन्ते। उपसर्ग-निपात-धातु-प्रातिपदिकादीनां विभागोऽपि काल्पनिक एव। "भूवादयो धातवः" (पाणिनिः, २०१८, सू. १/३/१) इत्यादिप्रक्रियासूत्राणां सार्थकता तदैव सम्भवति यदा एतेषु कल्पितभागेषु अर्थवत्त्वं स्वीक्रियते। यदि धातुरूपायां प्रकृतौ स्वाभाविकमर्थवाचकत्वं न स्यात्, तर्हि महाभाष्योक्ता "क्रियावाचिनो भ्वादयः" इत्युक्तिः असङ्गता भवेत्। अतः प्रक्रियादशायां वर्णप्रकृतिप्रत्ययादीनां वाचकत्वमेव वर्णस्फोटस्य मुख्यं प्रमाणम्।

### पदवाक्यस्फोटयोः प्रमाणम्

वर्णव्यतिरिक्तेन रूपेण पदस्य वाक्यस्य च वाचकत्वं वैयाकरणा इच्छन्ति, यस्य प्रमाणं महाभाष्ये कैयटप्रदीपे च स्पष्टं दृश्यते। महाभाष्यस्य "सर्वे सर्वपदादेशाः" (पतञ्जलिः, २०१७, पृ. २७४) इति सिद्धान्तरीत्या तथा च "येनोच्चारितेन सास्नालङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" (पतञ्जलिः, २०१७, पृ. ४)। इति शब्दलक्षणमादाय आचार्यकैयटेन स्पष्टीकृतं यत् "वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति" इति। अत्र "वर्णव्यतिरिक्तस्य" इति कथनेन मुख्यतया पदवाक्ययोः अखण्डत्वमेव सिद्ध्यति, यतो हि अर्थप्रतीतिः समूहात्मिकया अखण्डबुद्ध्या भवति, न तु पृथक्-पृथक् वर्णैः।

### खण्डत्वाखण्डत्वयोर्विरोधपरिहारः

यद्यपि स्फोटपरम्परायां पदं वाक्यं च अखण्डं मन्यते, तथापि "नित्येषु नाम शब्देषु कूटस्थैरविचालिभिः वर्णैः भवितव्यम्" (पतञ्जलिः, २०१७, पृ. २७३) इति महाभाष्योक्त्या खण्डत्वस्यापि प्रतीतिर्भवति । एतेन नित्येषु पदेषु वर्णा अवयवरूपेण प्रतीयन्ते, येन खण्डत्वस्य आभासो जायते। परन्तु अयं विरोधः केवलं व्यावहारिकः। वैयाकरणानां मते वर्णविभागः केवलं कृत्रिमः उपायभूतश्च अस्ति। वस्तुतस्तु अखण्डं पदं वाक्यं वा एकक्षणे अर्थप्रत्यायकं भवति, वर्णास्तु तस्यैव अभिव्यञ्जका अवयवा इव कल्प्यन्ते।

### जातिस्फोटव्यक्तिस्फोटयोर्बलाबलचिन्तनम्

स्फोटस्य पुनरपि द्वौ भेदौ दृश्येते जातिस्फोटः व्यक्तिस्फोटश्च। यदा घटशब्दत्वं नाम जातिर्वाचक इति मन्यते तदा जातिस्फोटः, यदा च एकैकः विशिष्टः शब्दव्यक्तिरर्थवाचक इति मन्यते तदा व्यक्तिस्फोटः। "अइउण्" इति प्रथमसूत्रस्य महाभाष्यप्रदीपे आचार्यकैयटेन एतयोः जातिव्यक्तिस्फोटयोः बलाबलविचारः कृतो विद्यते। दार्शनिकदृष्ट्या जातिस्फोटः मुख्यो मन्यते, यतो हि व्यक्तिनाशेऽपि जातेर्नित्यत्वात् शब्दार्थसम्बन्धस्य नित्यता सुरक्षिता भवति। तथापि प्रयोगदशायां व्यक्तिस्फोटस्यापि उपादेयता अङ्गीक्रियते।

## वाक्यस्फोटस्य मुख्यत्वम्

अष्टसु स्फोटेषु वाक्यस्फोटस्यैव मुख्यत्वं कौण्डभट्ट-नागेशभट्टाभ्यां सुस्पष्टं प्रतिपादितम्। लोके हि वाक्यादेवार्थस्य निराकाङ्क्षरूपेण ज्ञानं जायते, न तु एकस्माद् वर्णात् पदाद् वा। यतो हि साकाङ्क्षाणां पदानां समूहो यदा निराकाङ्क्षो भवति तदैव वाक्यं निष्पद्यते, तच्च व्यवहारे शक्तिग्रहस्य साधनं भवति। अतएव वाक्यस्फोटस्य मुख्यत्वम् अङ्गीक्रियते। न केवलं नवीनवैयाकरणाः, अपि तु स्वयं सूत्रकारः महर्षिपाणिनिरपि शब्दपदेन वाक्यस्फोटमेव स्मरति। यथा पाणिनीयसूत्रे— "स्वं रूपं शब्दस्याशब्दसंज्ञा" (पाणिनिः, २०१८, सू. १।१।६८) इत्यत्र स्वशब्दः आत्मीयं वाच्यार्थं बोधयति, रूपशब्दश्च स्वरूपं प्रकाशयति; अर्थात् शब्दविशिष्टं रूपमेव शब्दस्य वाचकं भवति तथा च "वचोऽशब्दसंज्ञायाम्" इति सूत्रेण पाणिनिना कुत्वघटितः वाक्यशब्दः शब्दरूपार्थे व्युत्पादितः। तेन वाक्यस्यैव मुख्यशब्दत्वं सिद्ध्यति, पदेषु वर्णेषु च शब्दत्वम् आरोपितमात्रमिति स्पष्टं सूचितम्। एतस्मिन् विषये अन्यशास्त्राणामपि सम्मतिर्दृश्यते; अत एव न्यायभाष्यकृतापि उक्तं यत्— "पदसमूहो वाक्यं अर्थसमाप्तौ" (गौतमः, २०१३, सू. २/१/२५) इति। अर्थात् विशिष्टार्थस्य निराकाङ्क्षबोधाय पदसमूहात्मकं वाक्यमेव समर्थं भवति। एतमेव सिद्धान्तं दृढीकृत्य आचार्यनागेशभट्टेन अपि परमलघुमञ्जूषायाम् उद्घोषितं यत्— "वाक्यस्फोटो मुख्यः, लोके तस्यैवार्थबोधकत्वात् तेनैवार्थसमाप्तेश्च" ( भट्टः, २०१७, पृ. ६) इति। एतेन लोकव्यवहारे प्रमाणभूतः वाक्यस्फोट एव सिद्ध्यति। वैयाकरणभूषणसारे कौण्डभट्टेनापि वाक्यस्फोटस्य मुख्यत्वं सप्रमाणं प्रदर्शितम्। यद्यपि वर्णस्फोटः पदस्फोटः इत्यादयः अष्टौ पक्षाः सिद्धान्ततः सिद्धाः, तथापि वाक्यस्फोटातिरिक्तानाम् अवास्तवत्वं बोधयितुं कौण्डभट्टः कारिकामुपस्थापयति —

**वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।**
**साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः॥** (भट्टः, २००१, का. ६१)

अनेन स्पष्टं प्रतिपाद्यते यत् साधुशब्दस्य अन्तर्गताः वर्णपदादयो बोधका न भवन्ति, अपि तु वाक्यस्फोट एव मुख्यो बोधको भवतीति। इत्थं नागेशकौण्डभट्टादिभिः समस्तैरपि वैयाकरणैः दर्शनान्तरीयाचार्यैश्च वाक्यस्फोटस्यैव मुख्यत्वं स्वीकृतम् , यतो हि वाक्यमेव लोके निराकाङ्क्षार्थबोधकं, तेनैव अर्थसमाप्तिश्च सम्भवति इति।

## निष्कर्षः

स्फोटवादो वैयाकरणानां प्रमुखः सिद्धान्तो वर्तते। "स्फुट विकसने" इति धातोः घञि प्रत्यये सति स्फोटशब्दस्य निष्पत्तिर्जायते। यस्यार्थो येन अर्थः प्रकाशते, येन च अर्थविषयकं ज्ञानं जायते, स एव स्फोट इति भवति । अयञ्च स्फोटो वर्णैर्ध्वनिभिर्वा अभिव्यक्तो भूत्वा अर्थप्रतीतिं जनयति, अतः "ध्वनिव्यङ्ग्यत्वे सति अर्थबोधजनकत्वम्" इति तस्य समुचितं लक्षणं सिद्ध्यति। शब्दस्वरूपविषये मीमांसका वर्णान् नित्यान् मन्यन्ते, नैयायिकाश्च वर्णानामनित्यत्वं स्वीकृत्य संस्कारसिद्धान्तेन अर्थबोधं साधयन्ति। परन्तु वैयाकरणाः उभयमतयोः सीमां दर्शयित्वा वर्णेषु प्रत्येकशः समूहरूपेण वा वाचकत्वं निराकृत्य वर्णातिरिक्तं नित्यं स्फोटतत्त्वमेव शब्दस्य परमं स्वरूपमिति प्रतिपादयन्ति। ऐतिहासिकदृष्ट्या स्फोटायनर्षिरस्य सिद्धान्तस्य आदिप्रवर्तको मन्यते, यस्य नामोल्लेखः पाणिनिना स्वयं कृतः। पाणिनिकात्यायनाभ्यामपि नित्यशब्दरूपेण स्फोटः समर्थितः। तदनन्तरं पतञ्जलि-भर्तृहरि-कौण्डभट्ट-नागेशभट्टादिभिराचार्यैः क्रमशः अस्य सिद्धान्तस्य दार्शनिको विकाशः कृतः। वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः इति

त्रीन् जाति-व्यक्तिभेदेन विस्तार्य अखण्डपदस्फोटं अखण्डवाक्यस्फोटञ्च योजयित्वा अष्टौ स्फोटा वैयाकरणैः सिद्धान्तिताः। अन्ते सर्वेषु अष्टसु स्फोटेषु अखण्डवाक्यस्फोट एव मुख्यः इति सिद्धान्तः प्रतिष्ठितः। लोके निराकाङ्क्षः अर्थबोधो वाक्यादेव जायते, न तु एकस्माद् वर्णात् पदाद् वा। अतएव नागेशेन "वाक्यस्फोटो मुख्यः, लोके तस्यैवार्थबोधकत्वात्" इति उद्घोषितम्। तथैव 'वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतिस्थिति' इति कथयता कौण्डभट्टेनापि वाक्यस्फोटस्यैव मुख्यत्वं प्रतिपादितम्।


## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञ्यं व्यनज्मि।


## सन्दर्भग्रन्थसूची


आचार्यः, श्रीवल्लभः (१९९१), न्यायलीलावती, चौखम्बा संस्कृत सीरीज।

गौतमः, (२०१३) न्यायसूत्रम्, (वात्स्यायनीयन्यायभाष्यसहितम्), चौखम्बा संस्कृत सीरीज।

पतञ्जलिः, (२०१७) व्याकरणमहाभाष्यम्, (चारुदेवशास्त्री, अनु.), मोतीलाल बनारसीदास।

पाणिनिः, (२०१८) अष्टाध्यायी, (शशिकान्तद्विवेदी, सम्पा.), शारदा संस्कृत संस्थान।

भट्टः, कौण्डः, (२००१) वैयाकरणभूषणसारः, दर्पणसुबोधिनीसहितः, चौखम्बा संस्कृत प्रतिष्ठान।

भट्टः, नागेशः, (२०१७) परमलघुमञ्जूषा, (भावप्रकाशिका-बालबोधिनीव्याख्योपेता), चौखम्बा कृष्णदास अकादमी।

भर्तृहरिः, (१९७७) वाक्यपदीयम्, (हेलाराजटीकोपेतम्), अनुसन्धान संस्थान सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

मिश्रः, आद्याप्रसादः, (१९८८) वैयाकरणभूषणसारः, (सावित्रीहिन्दीव्याख्योपेतः), सम्पूर्णानन्दविश्वविद्यालयः।

मिश्रः, राममनोहरः, (१९८३) भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

व्यासः, ( वि.सं. २०७५) श्रीमद्भागवतमहापुराणम्, गीताप्रेस।

व्यासः, (२०१८) हरिवंशपुराणम् , गीताप्रेस।

हरदत्तः, (१९८१) पदमञ्जरी, हैदरावाद, संस्कृतपरिषत् उस्मानियाविश्वविद्यालयः।